# स्त्रीप्रत्ययस्य सूत्रव्याख्याः

1. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः (7/3/44)।
वैयाकरणतल्लजश्रीमद्भट्टोजिदीक्षितविरचितायाः वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययप्रकरणे समुपलभ्यते इदं सूत्रशरीरम्।

सूत्रेऽस्मिन् सप्तपदानि सन्ति। प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इत्, आपि, असुपः इति च। सूत्रस्यास्य अर्थप्रतिपादनकाले दीक्षितपादेन उक्तम्, प्रत्ययस्थात् ककारात् पूर्वस्याकारस्येकारः स्यादापि परे, स आप् सुपः परो न चेत्। क् इति वर्णादित्यर्थः। अकार उच्चारणार्थः, वर्णात्कारः इत्युक्तेः। एवं च सूत्रे कादित्यत्र अकार उच्चारणार्थ इति सूचितम्। इत्त्वविधौ यः परनिमित्तत्वेनोपात्तः, स आबित्यर्थः। सूपे असुपः इति पञ्चम्यन्तम्, असमर्थसमासः। आप सुपः परस्मिन् सति इत्वं न भवतीत्यर्थो विवक्षित इति भावः। अस्योदाहरणं हि वालिका इति। वालक इत्यस्मात् पदात् परं स्त्रियाम् इति सूत्रम् अधिकृत्य प्रकृतेन सूत्रेण टाप्प्रत्यये विहिते सति वालिका इति रूपं जायते। एवञ्च कारिका, सर्विका इत्युदाहरणानि।

ननु सूत्रमध्ये प्रत्ययस्थात् इति पदं सूत्रे कथं प्रयुज्यते इति चेदुच्यते शक्नोतीति शका। एवञ्च असुपः इति किमर्थमुच्यते इति चेदाह बहुपरिव्राजका नगरी इति। कात् किम् इति किमर्थमुच्यते इति चेत् समाधिर्निगद्यते नन्दना इति। पूर्वस्य किमर्थमुच्यते इति चेत् समाधिर्निगद्यते परस्य मा भूत् इति दिक्॥

2. ऋन्नेभ्यो ङीप् (4/1/5)।
वैयाकरणमूर्धन्येन श्रीमद्भट्टोजिदीक्षितेन प्रणीतायां वैयाकरणसिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे इदं सूत्रं प्राप्यते।

सूत्रस्यास्य अर्थनिरूपणसमये दीक्षितपादेन उक्तं, ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात्। ऋतश्च नश्चेति द्वन्दसमासः। स्त्रियाम् इति अधिकृतम्। "ङ्याप्प्रातिपदिकात्" इत्यतः प्रातिपदिकग्रहणम् अनुवृत्तम्। ऋन्नकारैर्विशिष्यते। अतः अत्र तदन्तविधिः प्रयुज्यते।

अस्य सूत्रस्योदाहरणं हि कर्त्री इति। कर्तृ इति प्रातिपदिकात् अनन्तरं स्त्रीलिङ्गे ङीप्-प्रत्यये कर्त्री इदि पदं जायते। एवञ्च दात्री, नप्त्री, गन्त्री, जनयित्री इति रूपाणि निष्पद्यन्ते। अत्रेदं वक्तव्यं यत्, "यूनस्तिः" इति सूत्रमवलम्ब्य युवन् इति प्रातिपदिकात् अनन्तरं स्त्रियां ति प्रत्यययोगेन युवतिः इति पदं जायते। परन्तु यवत् इति प्रातिपदिकात् अनन्तरं शतृप्रत्यययोगेन स्त्रियां युवती इति रूपं जायते इति विशेष इत्यलं विस्तरेण इति शम्॥

3. <u>अनो बहुव्रीहेः</u> (4/1/12)।

वैयाकरणतल्लजश्रीमद्भट्टोजिदीक्षितविरचितायाः वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययप्रकरणे समुपलभ्यते इदं सूत्रशरीरम्।

सूत्रस्यास्य अर्थप्रतिपादनप्रसङ्गे वैयाकरणेन दीक्षितपादेन निरूपितम् अन्नन्ताद्बहुव्रीहेर्न ङीप् इति। सूत्रेऽस्मिन् अन इति बहुव्रीहेरित्यस्य विशेषणम्। अत्रापि तदन्तविधिः प्रयुज्यते। नेति ङीविति च अनुवर्तते।

अस्य उदाहरणं हि बहुयज्वा, बहुयज्वानौ इति। बहवो यज्वानो यस्या इति विग्रहः। नान्तलक्षणङीपः प्रतिषेधे राजवद्रूपाणि। "न संयोगात्" इति निषेधान्नायमुपधालोपी। अतोऽत्र "अन उपधालोपिनः" इति विकल्पो न प्रवर्तितुमर्हति इत्यलं विस्तरेण इति शम्॥

4. <u>यञश्च</u> (4/1/16)

वैयाकरणमूर्धन्येन श्रीमद्भट्टोजिदीक्षितेन प्रणीतायां वैयाकरणसिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे इदं सूत्रं प्राप्यते।

सूत्रस्य अस्य अर्थनिरूपणप्रसङ्गे वैयाकरणाचार्येण भट्टोजिदीक्षितेन प्रतिपादितं यञन्तात् स्त्रियां ङीप् स्यात् इति। सूत्रेऽस्मिन् यञः च इति पदद्वयं वर्तते। प्रथमं पदं षष्ठ्यन्तं पदं,

द्वितीयं च प्रथमान्तं पदमत्र विद्यते। किञ्च यञ इति प्रत्ययत्वात् तदन्तग्रहणम्। ऋन्नेभ्यः ङीप् इति सूत्रात् ङीप् इति अनुवर्तते। स्त्रियाम् इति अधिकृतं च भवति।

अस्य उदाहरणं हि गार्गी इति। गर्गस्य अपत्यं स्त्री इति। अत्र हलस्तद्धितस्य इति सूत्रमाधारीकृत्य यकारस्य लोपो भवति. यकारस्य लोपे च गार्गी इति पदं जायते। एवञ्च वात्स्य इत्यस्मात् पातिपदिकात् वात्सी इति रूपं जायते इति शम्।।

5. <u>वयसि प्रथमे</u> (4/1/20)।

वैयाकरणतल्लजश्रीमद्भट्टोजिदीक्षितविरचितायाः वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययप्रकरणे समुपलभ्यते इदं सूत्रशरीरम्।

सूत्रस्यास्य अर्थनिरूपणकाले वैयाकरणतल्लजेन श्रीदीक्षितेन उक्तं प्रथमवयोवाचिनो अदन्तात् स्त्रियां ङीप् स्यात्। सूत्रेऽस्मिन् वयसि प्रथमे चेति सप्तम्यन्तं पदद्वयं वर्तते। कालकृता शरीरावस्था एव वयः इत्युच्यते। यस्त्वर्थप्रकरणादिकमनपेक्ष्य श्रवणमात्रेण वयः प्रतिपादयति स वयोवाचीत्युच्यते अन्तरङ्गत्वात्।

"पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति।।" इति दर्शनात्।

चतुर्विधं वय इत्यन्ये –

"आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।। इति।" दर्शनात्।

प्रथमे वयसीत्यनन्तरं विद्यमानादिति शेषः। "अजाद्यतष्टाप्" इत्यतः अत इत्यनुवृत्तेन प्रातिपदिकात् इत्यधिकृतं विशेष्यते। अत्रापि तदन्तविधिः। स्त्रियाम् इत्यपि अधिक्रियते। "ऋन्नेभ्यः" इत्यतो ङीबित्यनुवर्तते। कुमारी इत्युदाहरणम् इति दिक्।।